# મનસાદેવી સ્તોત્રમ્

Manasa Devi Stotram

sanskritdocuments.org

July 27, 2018

# Manasa Devi Stotram

# મનસાદેવી સ્તોત્રમ્

## Sanskrit Document Information

Text title : Manasa Devi Stotram

File name : manasAdevIstotramBVP.itx

Category : devii

Location : doc_devii

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description/comments : shrIbrahmavaivarte mahApurANe dvitIye prakRitikhaNDe manasopAkhyAne

Acknowledge-Permission: http://kshetrayaatra.blogspot.com

Latest update : July 27, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

July 27, 2018

*sanskritdocuments.org*

# મનસાદેવી સ્તોત્રમ્

મહેન્દ્ર ઉવાચ ।
દેવીં ત્વાં સ્તોતુમિચ્છામિ સાધ્વિનીં પ્રવરાં પરામ્ ।
પરાત્પરાં ચ પરમાં ન હિ સ્તોતું ક્ષમોઽધુના ॥ ૧॥

સ્તોત્રાણાં લક્ષણં વેદે સ્વભાવાખ્યાનતઃ પરમ્ ।
ન ક્ષમઃ પ્રકૃતિં વક્તું ગુણાનાં તવ સુવ્રતે ॥ ૨॥

શુદ્ધસત્ત્વસ્વરૂપા ત્વં કોપહિંસાવિવર્જિતા ।
ન ચ શપ્તો મુનિસ્તેન ત્યક્તયા ચ ત્વયા યતઃ ॥ ૩॥

ત્વં મયા પૂજિતા સાધ્વિ જનની ચ યથાઽદિતિઃ ।
દયારૂપા ચ ભગિની ક્ષમારૂપા યથા પ્રસૂઃ ॥ ૪॥

ત્વયા મે રક્ષિતાઃ પ્રાણાઃ પુત્રદ્વારાઃ સુરેશ્વરિ ।
અહં કરોમિ ત્વાં પૂજ્યાં મમ પ્રીતિશ્ચ વર્ધતે ॥ ૫॥

નિત્યં યદ્યપિ પૂજ્યા ત્વં ભવેઽત્ર જગદમ્બિકે ।
તથાઽપિ તવ પૂજાં વૈ વર્ધયામિ પુનઃ પુનઃ ॥ ૬॥

યે ત્વામાષાઢસઙ્ક્રાન્ત્યાં પૂજયિષ્યન્તિ ભક્તિતઃ ।
પઞ્ચમ્યાં મનસાઽઽખ્યાયાં માસાન્તે વા દિને દિને ॥ ૭॥

પુત્રપૌત્રાદયસ્તેષાં વર્ધન્તે ચ ધનાનિ ચ ।
યશસ્વિનઃ કીર્તિમન્તો વિદ્યાવન્તો ગુણાન્વિતાઃ ॥ ૮॥

યે ત્વાં ન પૂજયિષ્યન્તિ નિન્દન્ત્યજ્ઞાનતો જનાઃ ।
લક્ષ્મીહીના ભવિષ્યન્તિ તેષાં નાગભયં સદા ॥ ૯॥

ત્વં સ્વર્ગલક્ષ્મીઃ સ્વર્ગે ચ વૈકુણ્ઠે કમલા કલા ।
નારાયણાંશો ભગવાન્ જરત્કારુર્મુનીશ્વરઃ ॥ ૧૦॥

તપસા તેજસા ત્વાં ચ મનસા સસૃજે પિતા ।

અસ્માકં રક્ષણાયૈવ તેન ત્વં મનસાભિધા ॥ ૧૧॥

મનસા વેદિતું શક્તા ચાઽઽત્મના સિદ્ધયોગિની ।
તેન ત્વં મનસાદેવી પૂજિતા વન્દિતા ભવે ॥ ૧૨॥

યાં ભક્ત્યા મનસા દેવાઃ પૂજયન્ત્યનિશં ભૃશમ્ ।
તેન ત્વં મનસાદેવી પ્રવદન્તિ પુરાવિદઃ ॥ ૧૩॥

સત્ત્વરૂપા ચ દેવી ત્વં શશ્વત્સત્ત્વનિષેવયા ।
યો હિ યદ્ભાવયેન્નિત્યં શતં પ્રાપ્નોતિ તત્સમમ્ ॥ ૧૪॥

ઇદં સ્તોત્રં પુણ્યબીજં તાં સમ્પૂજ્ય ચ યઃ પઠેત્ ।
તસ્ય નાગભયં નાસ્તિ તસ્ય વંશોદ્ભવસ્ય ચ ।  var  તસ્યવંશે ભવેચ્ચ યઃ
વિષં ભવેત્સુધાતુલ્યં સિદ્ધસ્તોત્રં યદા પઠેત્ ॥ ૧૫॥

પઞ્ચલક્ષજપેનૈવ સિદ્ધસ્તોત્રો ભવેન્નરઃ ।
સર્પશાયી ભવેત્સોઽપિ નિશ્ચિતં સર્વવાહનઃ ॥ ૧૬॥

ઇતિ શ્રીબ્રહ્મવૈવર્તે મહાપુરાણે દ્વિતીયે પ્રકૃતિખણ્ડે
મનસોપાખ્યાને શ્રીમનસાદેવી સ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by PSA Easwaran psaeaswaran at gmail.com

---

*Manasa Devi Stotram*
pdf was typeset on July 27, 2018

Please send corrections to *sanskrit@cheerful.com*